Shri Raghunatha Temple MSS. Library,
JAMMU

No. २८६५ / च

Title दशकुमार चरितम्

Author दण्डी

Extent ३२ पत्र Age

Subject आख्यायिका (काव्य)

© Dharmartha Trust J&K. Digitized by eGangotri

दशकुमारचरित पूर्वपीठिका

२५५

© Dharmartha Trust J&K. Digitized by eGangotri

नं. २३५८
कल्पद्रुमा-[illegible]
(अपूर्णा)
[illegible] पत्राणि
[illegible]
(काश्मीरि)
कर्ता: [illegible]
लिपि सं. १८३६ वि.

७२

© Dharmartha Trust J&K. Digitized by eGangotri

दश०

श्रीगणेशायनमः ब्रह्मांडच्छत्रदंडः शतधृतिभवनांभोरुहोनालदंडः क्षोणीनौकूपदंडः क्षर
दमरसरित्पट्टिकाकेतुदंडः ज्योतिश्चक्राक्षदंडस्त्रिभुवनविजयस्तंभदंडोघ्रिदंडः श्रेयस्त्रि
विक्रमस्तेवितरतुविबुधद्वेषिणांकालदंडः १ अस्तिसमस्तनगरीनिकषायमानाशश्वद
गण्यपण्यविस्तारितमणिगणादिवस्तुव्याख्यातरत्नाकरमाहात्म्यामगधदेशशेखरीभू
तापुष्पपुरीनामनगरीतत्रवीरभटपटलोत्तरंगतुरंगकुंजरमकरभीषणसकलरिपुगणकट
कजलनिधिमथनमंदरायमानसमुद्दंडभुजदंडमंडनः पुरंदरपुरांगणवनविहरणपरायण
गीर्वाणतरुणगणिकागणजेगीयमानयाऽतिमानयाशरदिंदुकुंदघनसारनीहारहारमृणा
लमरालसुरगजनीरक्षीरगिरिशाट्टहासकैलासकाशनीकाशमूर्त्यारचितदिगंतरालपू
र्त्याकीर्त्याऽभितः सुरभितःस्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेखलावलयितधरणी

© Dharmartha Trust J&K. Digitized by eGangotri

र श्र.
१

रमणीसौभाग्यभोगभाग्यवान्ऽनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासंभारभासुरभू
सुरनिकरोविरचितारातिसंतापेनप्रतापेनसततंतुलितवियन्मध्यहंसोराजहंसोनामधनदर्पकं
दर्पसोदर्यहृद्यनिरवद्यरूपोभूपोबभूवतस्यवसुमतीनामसुमतीलीलावतीकुलशेखरमणी
रमणीबभूवरोषरूक्षेणनिटिलाक्षेणभस्मीकृतचेतनेमकरकेतनेतदाभयेनानवद्यावनि
तेतिमतातस्याःरोलंबावलीकेशजालंप्रेमाकरोरजनीकरोविजितारविंदंवदनंजयध्वजायमानोजायायुतो
क्षियुगलंसकलसैनिकांगवीरोमलयसमीरोनिःश्वासःपथिकहृद्दलनःकरवालःप्रवालश्चाध
रबिंबविजययशःशंखोवंधुरलावण्यधराकंधरापूर्णकुंभौचक्रवाकानुकारौ पयोधरौज्यायमानेमाहवा
समानेविसलतेबाहूईषदुत्फुल्लीलावतंसकल्हारकोरकोगंगावर्त्तसनाभिर्नाभिर्दूरीकृतयोगिमनोर १
थोजैत्ररथोनितंबघनंजघनंजयस्तंभभूतेसौंदर्यभूतेविघ्नितयतिजनारंभेरंभेचोरुयुगंआतपत्रमह

© Dharmartha Trust J&K. Digitized by eGangotri

स्वपत्रं याद्दद्धयमसत्त्वभूतानि प्रसूतानि तानीतराराणंगानि च समभूवन्निव विजितामरपुरे पुष्पपुरे नि
वसता सानंतभोगलालिता वसुमतीव सुमतीव मगधराजे नयथासुखमन्वभावि· तस्य राज्ञः
परमविधेया धर्मपालपद्मोद्भवसितवर्मनामानस्सत्यवर्माणोधर्मपालस्य सुमंत्रसुमित्रकामपा
लाः पद्मोद्भवस्य सुश्रुतरत्नोद्भवाविति तनयाः समभूवन् तेषु धर्मशीलः सत्यवर्मा संसारा
सारतां बुध्वा तीर्थयात्राभिलाषी देशांतरमगमत्· विटनटवारनारीपरायणो दुर्विनीतः काम
पालो जनकाग्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम· रत्नोद्भवोपि वाणिज्यनिपुणतया
पारावारतरणमकरोत्· इतरे मंत्रिसूनवः पुरंदरपुरातिथिषु पितृषु यथापूर्वमन्वतिष्ठन्· ततः
कदाचिन्नानाविधमहदायुधनैपुण्यरचितागण्यजन्यराजन्यमौलिपालिनिहितनिशितसा
यको मगधनायको मालवेश्वरं प्रत्यग्रसंग्रामघस्मरं समुत्कटमानसारं प्रति सहेलं न्यक्कृतजल

© Dharmartha Trust J&K. Digitized by eGangotri

षिनिर्घोषाहंकारेणभेरीभांकारेणहठिकाकर्णनाक्रांतभयचंडिमानंदिग्दंतावलवलयंविघू

र्णयन्निजभरेनमन्मेदिनीभरणायस्तभुजगराजमस्तकंबलेनचतुरंगबलेनसंयुतः संग्रामाभि
लाषेणरोषेणमहताविष्टोनिर्ययौ॰ मालवनाथोप्यनेकानेकपयूथसनाथोविग्रहः सविग्र
हइवसाग्रहोभिमुखीभूयभूयोनिर्जगाम॰ तयोरथरथतुरगखुरक्षुण्णक्षोणीसमुद्भूतेकरिघ क्ष
टाघटस्खलन्मदधाराधौतमूलेनवबल्लभचरणागतदिव्यकन्याजनजवनिकापटमंडलेइव
विपन्नलव्याकुलभूलीपटलेदिविषदध्वनिधिकृतान्यध्वनिपटहध्वानबधिरिताशेषदिग
तरालेशस्त्राशस्त्रिहस्ताहस्तिपरस्पराभिहतसैन्यंजन्यमतनि तत्रमगधराजःप्रक्षीणसक
लसैन्यमंडलंमालवराजंजीवग्राहमभिगृह्यकृपालुतयापुनरपिस्वराज्येप्रतिष्ठापयामास २
ततःसरत्नाकरमेखलसैन्यमंडलामिलामनन्यशासनान्नशासधेपत्यतयानारायणंसक

© Dharmartha Trust J&K. Digitized by eGangotri

ल्लोककारणं निरंतरमर्चयामास अथ कदाचित्तस्य महिषी देवी देवेन कल्पवल्लीफलमादे
हीति प्रभातसमये सुस्वप्नमवलोकितवती सा तदा दयितमनोरथपुष्पभूतं गर्भमधत्त· रत्नसंपन्न
कृताखण्डलः सुहृन्नृपमंडलं समाहूय निजसंपन्नमनोरथानुरूपं देव्याः सीमंतोत्सवं व्यधत्त·
एकदा हितैः सुहृन्मंत्रिपुरोहितैः सभायां सभायां सिंहासनासीनो गुणैरहीनो ललाटतटन्यस्तां
जलिना द्वारपालेन व्यज्ञापि· देवदेवसंदर्शनलालसमानसः कोपि देवेन विरच्यार्चनार्हो यतिर्द्वा
रदेशमध्यास्त इति· तदनुज्ञातेन तेन स संयमी नृपसमीपमनायि भूपतिरायांतं तं विलोक्य स
म्यक्कृत्वा तदीयगूढचारभावान्निखिलमनुचरनिकरं विसृज्य मंत्रिजनसमेतः प्रणामितमेनं मं
दहासमभाषत ननु तापसदेशं सापदेशमतनवांस्तत्र तत्रभवदभिज्ञानं कथयेति तेना
भाषि भूषणमणिवलिना प्रांजलिना देवशिरसि देवस्याज्ञामादायैनं निर्दोषं वेषं स्वीकृत्य माल

© Dharmartha Trust J&K. Digitized by eGangotri

र॰त्रा· वेद्वनगरं प्रविश्य तत्र गूढतरं वर्त्तमानस्तस्य राज्ञः समस्तमुदंतजातं विदित्वा प्रत्यागमं मानी मानसा
२ रः स्वसैनिकायुष्मन्नंतरापि संपराये भवतः पराजयमनुभूय वैलक्ष्यलक्ष्य हृदयो वीतदर्पो महा
3 कालनिवासिनं कालीविलासिनमनश्वरं महेश्वरं समाराध्य तपः प्रभावसंतुष्टादस्मादेकवी
राराति घ्नीमयदां लब्ध्वा ऽऽत्मानमप्रतिभटं मन्यमानो महाभिमानो भवं ततः परदेव एव प्रमाण
मिति। तदालोच्य निश्चितकृत्यैरमात्यै राजा विज्ञापितो भूत्‌· देवनिरूपायेन दैवसहायेन यो
द्धुमरातिरायाति· तस्मादस्माकं युद्धं सांप्रतमसांप्रतं· सहसा दुर्गसंश्रयः क्रियतामिति·
तैर्बहुधा विज्ञापितोप्यखर्वेण गर्वेण विराजमानो राजा तद्वाक्यमकृत्यमित्यनादृत्य प्रतियोद्धु
मना बभूव। शितिकंठदत्तशक्तिसारो मानसारो योद्धुमनसामग्रीभूय सामग्रीसमे २
तोऽक्लेशं मागधदेशं प्रविवेश· तदा तदाकर्ण्य मंत्रिणो भूमौ हेंद्रं कथंचिदनुनीय रिपुभि

© Dharmartha Trust J&K. Digitized by eGangotri

रसाध्ये विंध्याटवीमध्ये वरोधान्मूलवलरक्षितान्निवेशयामासतुः राजहंसस्तु प्रशस्तवीतंदे
न्यं सैन्यसमेतस्तीव्रगत्या निर्गत्याऽधिकरुषं हि संरोध परस्परवद्धवैरयोरेतयोः शूरयोस्तदा
लोकनकुतूहलागतगगनचराश्चर्यकारणे रणे वर्त्तमाने जयाकांक्षी मालवदेशरक्षी विवि
धायुधस्थैर्यचर्याचितसमरतुलितामरेश्वरस्य मगधेश्वरस्य तस्योपरि गुणगुरां तीव्रां गदां
प्राहिणोत्· निशितशरनिकरशकलीकृतापि सा पशुपतिशासनस्यावंध्यतया सूतं निहत्य रथ
स्थं राजानं मूर्छितमकार्षीत्· ततो वीतप्रग्रहा अक्षतविग्रहा वाहा रथमादाय दैवगत्यांतःपु
रशरण्यं महारण्यं प्राविशन्· मालवनाथो जयलक्ष्मीसनाथो मगधराज्यं प्राज्यं समाक्रम्य
पुष्पपुरमध्यतिष्ठत् तत्र हेतिततिहतिश्रांता अमात्या दैवगत्याऽनुत्क्रांतजीविता निशांतवात
लब्धसंज्ञाः कथंचिदाश्वस्य राजानं समंतादन्वीक्ष्यानवलोकितवंतो दैन्यवंतो देवीमवापुः

© Dharmartha Trust J&K. Digitized by eGangotri

र॰त्ना
४
५

वसुमतीतुतेभ्योनिखिलसैन्यक्षतिंराज्ञोऽदृश्यत्वंचाश्रौषीत्तस्माच्छोकसागरमग्नारमणानुमतिं
व्यधत्त· कल्याणि भूरमण मरणमनिश्चितमरणे किंचदैवज्ञकथितोमथितोद्धतारातिः सार्व
भौमोऽभिरामोभवितासुकुमारकुमारस्त्वदुदरेवसतीति· ततस्मादद्यतवमरणमनुचितमितिभूषि
नभाषितैरमात्यपुरोहितैरनुनीयमानतयाक्षणक्षणहीनयातूष्णीमस्थापित्र्यथाईदात्रेनि
द्रानिलीटनेत्रेपरिजनेविजनेशोकपारावारमयारमुत्तर्तुमशक्नुवंतीसेनानिवेशाद्दृग्भिः शाव
लेशंचानैरतिक्रम्ययस्मिन् रथस्यसंसक्ततयातदानयनपलायनश्रांतागंतुमक्षमाक्ष्मा
पतिरथ्याः पथ्याकुलाः पूर्वमतिष्ठन्· तस्यनिकटवटतरोः शाखायामुत्तिरखायामिवक्वचिद्
त्तरीयार्द्धेनबंधनंमृतिसाधनंविरच्यमर्तुकामावांधुरीविरसीकृतकलकंठासाश्रुकंठावल ४
पत· लावण्योपमितपुष्पसायकभूनायकभवानेवभाविन्यपिजन्मनिवल्लभोभवतादिति त

© Dharmartha Trust J&K. Digitized by eGangotri

द्राकर्पनीहारकिरणनिकरसंपर्कलब्धावबोधो मागधोऽगाधरुधिरविक्षरणनष्टचेष्टो
देवीवाक्यमेव निश्चित्वा नरत्नवान्ः प्रियंवचनानिश्रावनेत्नामाद्भूयत सासंभ्रममागत्यामं
द हृदयानंदसंफुल्लवदनारविंदात मुपोपिताभ्यामिवानिमिषिताभ्यांलोचनाभ्यांसंद्रा
ष्यविकस्वरेण स्वरेण पुरोहितामात्यजनमुच्चैराहूयतेभ्यस्तमदर्शीयत राजानिटिलतटेचुं
चितनिजचरणांबुजैः मन्त्रंश्रितं देवमाहात्म्यं रमात्येरभाणि देवराय्यचेयः सारथ्यपग
मेरथंरमसादरण्यमनयदिति तत्र निहतसेनिकग्रामे संग्रामे मालवपतिनाऽ रोषितपु
ऽरातिना प्रहितमागदयारुयाहीनेन ताडितो मूर्छामागत्यात्र निक्रांतपवनेन वोधितोऽ भव
मितिमहीपतिरकथयत ततो विरचितमहेन मंत्रिनिवहेन विरचितदेवानुकूल्येन कालेन त्रिवि
रमानीयापनीतान्ते पञ्चशल्यो विकसितनिजाननारविंदो राजा सहसाविरोपितव्रणोऽकारिं

© Dharmartha Trust J&K. Digitized by eGangotri

दरा· विरोधिदैवविधिकृतपुरुषकारोदैन्यव्याप्ताकारोमगधाधिपतिरधिकाधिरमात्यसंमत्यमिदमभा
षितयातयावतुमत्यामत्याचकै चिंतयासमबोधि· देवसकलस्यभूपालकुलस्यमध्येते
५ जोवरिष्ठोगरिष्ठोभवाननघवनमध्येनिवसतीतिजलबुद्बुदसमानाविराजमानासंपत्तिरुल्ल
5 तो·वमहसैवोदयतिनत्रूपतिच· तन्निखिलंदैवायत्तमेवावधार्यकार्यंकिंचपुराहरिश्चंद्रा
मचंद्रमुख्याश्चसंख्यामहीन्द्रारोत्वघोपमितमहेंद्रादेवतेत्रं दुःखपंचंसम्यगनुभूयपश्चाद
नेककालंनिजराज्यमकुर्वंन· तद्देवभवान्नविष्यतिकंचनकालंविरचितदैवसमाधिर्गलि
तोधिस्तिष्ठतुतावदिति· ततः सकलसैन्यसमन्वितोराजहंसस्तपोविभ्राजमानंवामदेवना
मानंतपोधनंनिजाभिलाषावाप्तिसाधनंजगाम तंप्रणम्यतेनकृतातिथ्यस्तस्मैकथितकथ्य ५
स्तदाश्रमेदरीकृतश्रमेवं त्वनकालमुषित्वानिजराज्याभिलाषीमितभाषीसोमकुलावतं

© Dharmartha Trust J&K. Digitized by eGangotri

सोराजहंसोमुनिमभाषत: भगवन्मानसारः प्रवलेनदैववलेन मां निर्जित्य मद्भोज्यं राज्यमनु
भवति· तदहमुग्रंतपोविरच्यतमरातिमुन्मूलयिष्यामिलोकशरण्येनभवत्कारुण्येनेतिनि
यमवंतंभवंतंप्राप्नुवमिति ततस्त्रिकालज्ञस्तपोधनोराजानमवोचत· सखेशरीरकार्श्यकारि
णातपसाऽलं वसुमतीगर्भस्थः सकलरिपुकुलमर्दनोराजनंदनोनूनंसंभविष्यतिकंचन
कालंतूष्णीमास्स्वेति गगनचारिण्यापिवाण्यासत्यमेतदितितद्वीवोचिमराजापिमुनिवाक्य
मंगीकृत्यातिष्ठत· ततःसंपूर्णगर्भदिवसावसुमतीसुमुहूर्तेसकललक्षणलक्षितंसुतम
सूत ब्रह्मवर्चसेनतुलितवेधसंपुरोधसंपुरस्कृत्यकृत्यविन्महीपतिःकुमारंसुकुमारंजात
संस्कारेणबालालंकारेणचविराजमानंराजवाहननामानंव्यधत्त· तस्मिन्नेवकालेसुमति
सुमंत्रसुमित्रसुश्रुतानांमंत्रिणांप्रमतिमित्रगुप्तमंत्रगुप्तविश्रुताख्यामहदभिख्याःसूनु

© Dharmartha Trust J&K. Digitized by eGangotri

द.कु. वोनवोपदिष्टं दुरुचष्विरायुषः समजायंतां राजवाहनो मंत्रिपुत्रैरात्ममित्रैः सहबालकेलीरनुभ
६ वन्नवर्द्धत कदाचिदेकेन तापसेन रसेन राजलक्षणविराजितं कंचिन्नयनानंदकरं सुकुमारं कु
मारं राज्ञे समर्प्यवोचि भूवल्लभ कुशसमिदानयनाय वनं गतेन मया काचिदशरण्या व्यक्तका
6 र्पण्याश्रु मुंचती युवती विलोकिता निर्जने वने किंनिमित्तं रुद्यते त्वयेति पृष्टा सा कररूहैरश्रु
प्रमृज्य सगद्गदं मामवोचत् मुने लावण्यजितपुष्पसायके मिथिलानायके कीर्त्तिव्यापत
सुधर्मणि निजसुहृदो मगधराजस्य सीमंतिनीसीमंतमहोत्सवाय पुत्रदारसमन्वितेपुष्पपुरमु
पेत्य कंचनकालमधिवसति समाराधितगिरीशो मालवाधीशो मगधराजं योद्धुमभ्यगात्। तत्र प्र
ख्यातप्रोरे तयोरसंख्ये संख्येवर्त्तमाने सुहृत्साहाय्यकं कुर्वाणो निजबले सति विधेयविदेहेश्वरो ६
जयवता रिपुणाभिगृह्य कारुण्येन पुण्येन विसृष्टो हतावशेषेण शून्येन सैन्येन सह स्वपुरगमन

© Dharmartha Trust J&K. Digitized by eGangotri

मकरोत्‌ ततोवनमार्गेणगच्छन्नधिकबलेनशबलेनरमस्मादभिहन्यमानोमूलबलाभिरक्षिता
वरोधःपलायिष्ट तदीयार्भकयोर्यमलयोर्धात्रीभावे परिकल्पिताहंमद्दुहितापितीव्रगतिंभूपति
मनुगंतुमक्षमेत्यभूवं तत्रविहृतवद्भिः कोपिरूपीकोपस्यव्याघ्रोमामाघ्रातुमागतवान् भीता
हमुदग्रपाणिस्खलंतीपर्यपतं मदीयपाणिभ्रष्टोबालकः कस्यापिकपिलागवस्यक्रोडम
व्यलीयत तद्गवाकर्षिणीमर्षिणोव्याघ्रस्यप्राणान्बाणेनवाणासनयंत्रमुक्तेनापाहरत् विलो
लोलकोबालकोपिशबरेणादायकुत्रचिदुपानीयत कुमारमपरमुद्वहंतीमद्दुहिताकुत्रगतान
जाने साहंमोहंगताकेनापिकृपालुनावृष्णिपालेनगोपालेनस्वकुटीरमावेश्यविरोपितव्रणाभ हि
वंततः स्वस्थीभूयभूपः क्ष्मामर्तुरंतिकमुपतिष्ठासुरसहायतयादुहितुरनभिज्ञाततयाव्या
कुलीभवामीत्यभिदधानाएकाकिन्यपिस्वामिनंगमिष्यामीतिसातदेवनिरगात् अहमपि

© Dharmartha Trust J&K. Digitized by eGangotri

दशा॰ ७ भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवन् तदन्वयांकुरं कुमारमन्विष्यन्
तदैकं चंडिकामंदिरं सुंदरमगां· तत्र संततं तन्वैवंविधविजयसिद्धये कुमारं देवतोपहारं करिष्यं
तः किराताः महीरुहशाखावलंबितमेनमभिलतयावासेकततले खनननिक्षिप्तचरणं
लक्षीकृत्य शितशरनिकरेण वानेकचरणैः पलायमानं कुक्कुरबालकैर्वा दंशयित्वा सं
हनिष्यामः इति भाषमाणा मया समभ्यभाष्यत भो ननु किराता नेमा घोरप्रचारे कांतारे सख
लितपथः स्थविरभूसुरोहं मम पुत्रकं क्वचिच्छायायां विक्षिप्य मार्गान्वेषणाय किंचिदंतर
मगच्छं· स कुत्र गतः केन वा गृहीतः परीक्ष्यमाणोपि न वीक्ष्यते· तन्मुखालोकनेन विना निकामं
हान्यतीतानि किं करोमि क्व यामि भवद्भिर्न किमदर्शि इति द्विजोत्तम कश्चिदत्र तिष्ठति किमेष ७
तव नंदनः सत्यमेतदेनं गृहाण त्वत्कादेवानुकूल्येन मह्यं तं व्यतरन्· तेभ्यो दत्ताशीरहं बाल

क्रमंगीकृत्यशिशिरोदकादिनोपचारेणाश्वास्यनिजार्भकं भवदंकमानीतवानस्मि· एनमायुष्मं
तंपितृरूपोभवानभिरक्षतादिति· राजासुहृदापन्निमित्तंशोकंतन्नंदनवदनविलोकनसुखेन
किंचिदधरीकृत्यतमुपहारवर्मनाम्नाचाहूयराजवाहनमिवपुपोषजनपतिरेकस्मिन्दिवसे
तीर्थस्नानाय पक्कणनिकटमार्गेणगच्छन्नवलयाकयापिउपलालितमनुपमशरीरंकुमारंकंचि
दवलोककुतूहलाकुलस्तामपृच्छत्· भामिनिरुचिरमूर्त्तिःसराजगुणसंपूर्तिरसावर्भकोभवदन्व
यसंभवोनभवतिकस्यनयनानंदनोनिमित्तेनकेनभवदधीनोजातःकथ्यतांयाथातथ्येनेय
ति· प्रणतयाशबर्यासलीलमलापि· राजन्नात्मपल्लीसमीपेपदव्यांवर्त्तमानस्यमिथिलेश्व
रस्यसर्वस्वमपहरतिशाबरसैन्येमद्दयितेनापहृत्यकुमारएषमह्यमर्पितोव्यवर्द्धत· तदवधार्य
कार्यज्ञोराजामुनिकथितंद्वितीयंराजकुमारमेवनिश्चित्यसामदानाभ्यांतामनुनीयापहारवर्म

© Dharmartha Trust J&K. Digitized by eGangotri

दक्षा· त्याख्यायै देव्यै वर्द्धयेति समर्पितवान्· कदाचिद्वामदेवशिष्यः सोमशर्मा नाम कंचिदेकं बालकं रा
८ ज्ञः पुरो निक्षिप्याभाषत देव रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धा
8 र्यमाणमेनमुज्ज्वलाकारमस्य विलोक्य सादरमभाणि· स्थविरे का त्वमेतस्मिन्नटवीमध्ये बालक
मुद्वहंती किमर्थमायासेन भ्रमसीति वृद्धयाप्यभाषि मुनिवर कालयवननाम्नि द्वीपे कालगुप्तो ना
म धनाढ्यो वैश्यवरः कश्चिदस्ति तन्नंदिनीं नयनानंदकारिणीं सुवृत्तां नामैतस्मादागतो मगधना
थमंत्रिसंभवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रांतभूवलयो मनोहारी व्यवहारी उपयम्य सुतु
त्स्यपदा श्वशुरेण संमानितोभूत्· कालक्रमेण नतांगी गर्भिणी जाता ततः सोदरविलोकनकुतू
हलेन रत्नोद्भवः कथंचित्श्वशुरमनुनीय चपललोचनया सह प्रवहणमारुह्य पुष्पपुरमभिप्रत ८
स्थे· कल्लोलमालिकाभिहतः पोतः समुद्रांभसि मज्जत गर्भभरालसां ललनां धात्रीभावेन कल्पि

© Dharmartha Trust J&K. Digitized by eGangotri

ताः ॥ इंकरण्यां मुहुर्हंती फलकमेकमधिरुह्य दैवगत्यातीरभूमिमगमं तत्र तज्जनपरिवृते रलोद्भवस्त
त्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि ॥ क्लेशेनास्य परां काष्ठामधिगतास्मि हन्ता स्मिन्नटवीम
ध्ये ह्यसुतमसूत ॥ अस्तवं वेदनया विचेतना सा प्रच्छायपत्यन्तलेतरुतलेनिवसति ॥ विजनेवने स्थातुम
शक्नुवत्या जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गं
तुमनुचितमिति कुमारोप्यनायीति ॥ एतस्मिन्नेव क्षणे वन्यो वारणः कश्चिदस्मदुपततं विलोक्याभी
तातन्निपात्याद्रवत् ॥ अहं समीपलतागुल्मं प्रविश्य परीक्षमाणा तिष्ठामि पतितं बालकं पल्ल
वकवलमिवाददति गजपतौ केसरी रवो महाग्रहेणन्यपतत् ॥ भयाकुलेन दंताबलेन झटिति विप
तिपात्यमानो बालकोन्यपतत् ॥ चिरायुष्मत्तया सल्लोल्लतते रुशाखासमासीनेन वानरेणाके
न चित्यक्कफलमनीषया परिगृह्य फलेतरतया वितनस्कंधमूले निक्षिप्तोभूत् सोपि मर्कटः क्व

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रा· ९ चिरगात्· बालकेन संततसंपन्नतया सकलक्लेशसहेनाभावि· केसरिणा करिणं निहत्य कुत्र
चिरगामिलता गृहान्निर्गतोहमपि तेजःपुंजं बालं शनैरवनीरुहादवतार्य वनांतरे वनितामनि
9 ष्याविलोकेन मानीय प्रसुखेन निषेव्य तन्निर्देशेन भवन्निकटमानीतेवानस्मीति· सर्वेषां सुहृदा
मेकदैवानुकूलदैवाभावेन महदाश्चर्यं विभ्राणो राजा रत्नोद्भवः कथमभवदिति चिंतयन् तनं
देनं पुथोद्भवनामधेयं विधाय तदुदंतं व्याख्याय सुश्रुताय विषादसंतोषावनुभवन् तदनुजेतन
यं समर्पितवान्· अन्येद्युः कंचन बालकमुरसि दधती वसुमती वल्लभमभिगता तेन कुत्रत्यो सावि
ति पृष्टा समभाषत· राजन्नतीतायां रात्रौ काचन दिव्यवनिता मत्पुरतः कुमारकमेकं संस्थाप्य
निद्रामुद्रितां मां विबोध्य विनीताब्रवीत्· देवि त्वन्मंत्रिणो धर्मपालनंदनस्य कामपालस्य वल्ल ९
भा यक्षकांताः हं तारावली नाम नंदिनी माणिभद्रस्य यक्षेश्वरानुमत्या मदात्मजमेनं भवत्तनूजस्यां

© Dharmartha Trust J&K. Digitized by eGangotri

म्भोनिधिवलयवेष्टितक्षोणीमंडलेश्वरस्य मानभृतो विश्रुतस्याज्ञया निधे राजवाहनस्य परिचर्याक
रणायानीतवन्मास्मित्वमेनं मनोजसंनिभमभिवर्द्धयेति· विस्मयविकसितनयनयामयास विन
यामत्कृतास्वक्षीयक्षी· नीतवन्मास्मित्वमेनं मनोजसंनिभमभिवर्द्धयेति· विस्मयविकसितन
युनयामयासविनयामत्कृतास्वक्षी॥ साप्यहृष्यतामयासीदिति· कामपालस्ययक्षकन्या
संगमेविस्मयमानमानसो राजहंसो रंजितमित्रेस्तु मित्रमाहूय तदीयभ्रातृपुत्रमर्थपालं विधा
यतस्मै सर्ववार्त्तादिकं व्याख्यापोदात्· ततः परस्मिन् दिवसे वामदेवांतेवासी तदाश्रमवासी
समाराधितदेवकीर्त्तिनिर्भर्त्सितमारमूर्त्तिं कुसुमसुकुमारं कुमारमेकमवगमय्य नरपतिमवा
दीत्· देवतीर्थयात्राप्रसंगेन कावेरीतीरमागतोहं विलोलालकं बालकं निजोत्संगते निधाय
रुदंतीं स्थविरामेकां विलोक्यावोचिषं· स्थविरे कात्वमयमर्भकः कस्य नयनानंदकरः का

© Dharmartha Trust J&K. Digitized by eGangotri

द्श्र॰
१०
10

तारं किमर्थमागतासि शोककारणं किमिति सा करयुगेन बाष्पजलमुत्सृज्य निजशोककथां कृत्स्ना
टनक्षममिवमामवलोक्य शोकहेतुमवोचत् द्विजात्मजराजहंसमंत्रिणः सितवर्मणः कनीयाना
त्मजः सत्यवर्मा तीर्थयात्राभिलाषेण देशान्तरमागच्छत् स कस्मिंश्चिदग्रहारे कालीनामेकस्य भू
सुरस्य नन्दिनीं विवाह्य तस्यामनपत्यतया गौरीनाम तद्भगिनीं काञ्चनकाञ्चनकान्तिं परिणीय तस्या
मेकं तनयमलभत। काली सासूयमेकदा धात्रीमया सह बालमेनमेकेन मिषेणानीय तटिन्या
मेतस्यामक्षिपत् करेणैकेन बालमुद्धृत्यापरेणास्कंवमाना नदीवेगागतस्यैकस्य चित्रतरोः प्रगल्भा
मवलम्ब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन कालभोगिनाहमदंशि। म
दवलम्बीभूतो महीरुहोयमस्मिन्देशे तीरमगमत्। गरलस्योद्दीपनतया मयि मृतायामरण्यैक
श्च न शरण्यो नास्तीति मयाऽशोच्यत इति ततो विषमविषज्वालावलीवाकोवा साधरणीत १०

© Dharmartha Trust J&K. Digitized by eGangotri

लेन्यपतत् दयाविष्टोहं मन्त्रबलेन विषव्यवस्थामपनेतुमक्षमः समीपकुञ्जेष्वौषधिविशेषमवि त्रि
ष्यमस्यागतोऽमुं त्यक्तजीवितामलोकयं तनुजस्याः पावकसंस्कारं विरच्य शोकाकुलचेता बा
लमेनमगतिमादाय सत्यवर्मसुतं ज्ञात्वा श्रवणवेलायां तन्निवासमायुहारनामधेयस्याश्रुतत्वेन यातद
न्वेषणमत्राकार्षमित्यालोच्य भवदमात्यतनयस्य भवानेवाभिरक्षितेति भवन्तमेनमनयमिति तं
निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततयाखिन्नमानसो नरपतिः सुमतये मन्त्रिणे सोमद
त्तं नाम तत्सुतं तनयमर्पितवान् सोपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष एवंमि
लितेन कुमारमण्डलेन बालकेलीरनुभवन्नधिरूढानेकवाहनो राजवाहनोऽनुक्रमेण चौलोपन
यनादिसंस्कारजातमलभत ततः सकललिपिज्ञानं निखिलदेशीयभाषापाण्डित्यं षडङ्गस
हितवेदसमुदायकोविदत्वं काव्यनाटकाख्यानकाख्यायिकेतिहासचित्रकथासहितपुराण

© Dharmartha Trust J&K. Digitized by eGangotri

गणनैपुण्यंधर्मशास्त्रज्योतिस्तर्कमीमांसादिसमस्तशास्त्रचातुर्यंकौटिल्यकामंदकीयादिनीति
पटलकौशलंवीणाद्यशेषवाद्यदाक्ष्यंसंगीतसाहित्यहारित्वंमणिमंत्रौषधादिमायाप्रपंचपाटवं
मातंगतुरंगादिवाहनारोहणपाटवंविविधायुधप्रयोगचणत्वंचौर्यदुरोदरादिकपटकलाप्रौढ
त्वंचतत्तदाचार्येभ्यः सम्यक्लब्ध्वायौवनेनविलसंतंकुमारनिकरंनिरीक्ष्यम
हीवल्लभःसोहंशत्रुजनदुर्लभइतिपरमानंदममंदमविंदत इतिश्रीदंडिनःकृतौदशकुमारचरि
तेकुमारोत्पत्तिर्नामप्रथमउच्छ्वासः अथैकदावामदेवः सकलकलाकुशलेनकुसुमसा
यकसंशायितसौंदर्येणकल्पितसोदर्येणसहसापहसितकुमारेणसुकुमारेणजयध्वजात
पवारणकलशांकितकरेणकुमारनिकरेणपरिवेष्टितंराजानमानतशिरसंसमभिगम्यतेनतां ११
कृतपरिचर्यामंगीकृत्यनिजचरणकमलयुगलमिलन्मधुकरायमानकाकपक्षंविदलिष्ठ

© Dharmartha Trust J&K. Digitized by eGangotri

माणविपक्षं कुमारचयं गाढमालिंग्य मितसत्यवाक्येन विहिताशीरभ्यभाषत· भूवल्लभ भवदीय
फल२ मनोरथपुष्पमिव समृद्धलावण्यं तारुण्यमनुतमित्रो भवत्पुत्रोऽनुभवति· सहचरसमेतस्य नूनमे
तस्य दिग्विजयारंभसमय एषः· तदस्य सकलक्लेशसहस्य राजवाहनस्य दिग्विजयः प्रमाणं क्रि
यतामिति· कुमारा माराऽभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा र
णाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः· तत्साचिव्यमितरेषाम्य विधाय समुचितां
बुद्धिमुपदिश्य शुभे मुहूर्ते सपरिवारं कुमारं विससर्ज· राजवाहनो मंगलसूचकं शुभशकुनं वि
लोकयन्देशं कंचिदतिक्रम्य विंध्याटवीमध्यमविशत्· तत्र हेतिहतिकिणांकं कालायसक
र्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं लोचनपरुषं कमपि पुरुषं ददर्श·
तेन विहितपूजनो राजवाहनोऽभ्यभाषत ननु मानवजनसंगरहिते मृगाहितघोरप्रचारे कांता

दश· रे विंध्याटवीमध्ये भवानेकाकी किमिति वसति· भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति· हेति
१२ हतिभिः किरातरीतिरनुमीयते कथय किमेतदिति· तेजोमयोऽयं मानुषमात्रपौरुषो नूनं न भवतीति म
त्वा स पुरुषस्तद्वयस्यमुखान्नामजनने विज्ञाय तस्मै निजवृत्तान्तमकथयत् राजनंदन केचिदस्यामट
12 घा व्यां वेदादिविद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य सत्यशौचादिधर्मव्रतं परिहृत्य किल्बिषमन्वि
ष्यंतः पुलिंदपुरोगमास्तदन्नमुपभुंजाना बहवो ब्राह्मणब्रुवा निवसंति तेषु कस्यचित्पुत्रो निंदापात्र
चारित्रो मातंगो नामाहं· स च किरातबलेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीय
बंधने निधाय तेषां सकलधनमपहरन्नुद्धतवीतदयो व्यचरं कदाचिदेकस्मिन्कांतारे मदीयसहचर
गणेन जिघांस्यमानं भूसुरमेकमवलोक्य दयायत्तचित्तोऽब्रुवं· ननु पापा न हंतव्यो ब्राह्मण इति· ते १२
रोषारुणनयना मां बहुधा निरभर्त्सयत् तेषां भाषणपारुष्यमसहिष्णुरहमवनीसुररक्षणाय चि

© Dharmartha Trust J&K. Digitized by eGangotri

रंप्रबुद्धैस्तैरभिहतोगतजीवितोऽभवंततःप्रेतपुरीमुपेत्यतत्रदिव्यदेहधारिभिःपुरुषैःपरिवेष्टितंस
भामध्येरत्नखचितासिंहासनासीनंयमंविलोक्यतस्मैदंडप्रणाममकरवंसोपिमामवेक्ष्यचि
त्रगुप्तंनाममनिजामात्यमाहूयतमवोचत् सचिवमेषोमुष्यमृत्युसमयः निंदितचरितोप्ययंमही
सुरनिमित्तंगतजीवितोभूत् इतःप्रभृतिविगलितकल्मषस्यास्यपुण्यकर्मकरणेरुचिरुदेष्यति॰
पापिष्ठैरनुभूयमानमत्रयातनाविशेषंविलोक्यपुनरपिपूर्वशरीरमनेनगम्यतामितिचित्रगुप्तोपि
तत्रसंततेष्वायसस्तंभेषुबध्यमानान्अत्युष्णीकृतेचिततशरावतैलेक्षिप्यमानान् लगुडैर्ज
र्जरीकृतावयवान् निशितटंकैःपरितक्ष्यमाणानपिदर्शयित्वापुण्यबुद्धिमुपदिश्यमाममुंचत्
तदेवपूर्वशरीरमहंप्राप्तोमहाटवीमध्येशीतलोपचारंरचयतामहीसुरेणपरीक्ष्यमाणःशि
लायांशायितः क्षणमतिष्ठंतदनुविदितोदंतोमदीयबंधुगणः सहसासमागत्यमंदिरमानीयमा

© Dharmartha Trust J&K. Digitized by eGangotri

द॰शा॰ पपक्रांतव्रणमकरोत्· द्विजन्माकृतस्नोमहामक्षरश्मिक्षांविधायविविधागमतंत्रमाख्यायक
ल्मषक्षयकारणंसदाचारमुपदिश्यतेनेक्षणागम्यमानस्यत्रशिखिखंडचूडस्यपूजाविधानम
१३ भिधायपूजांमत्कृतामंगीकृत्यनिरगात्· तदारभ्याहंकिरातकृतसंसर्गबंधुकुलमुत्सृज्यसक
13 ललोकैकगुरुमिंदुकलावतंसंचेतसिस्मरन्नस्मिन्काननेकृशीकृतकलेवरोवसामिदेवभवते
विज्ञापनीयंरहस्यंकिंचिदस्यागम्यतामितिसचववपस्यगणाद्यनीपरहसिपुनरेनमभाष
त्· राजन्नतीतेनिशांतेगौरीपतिः स्वप्नसंनिहितोनिद्रामुद्रितलोचनंविबोध्यप्रसन्नवदन
कांतिः प्रश्रयावनतंमामचोचत्· मातंगदंडकारण्यांतरालगामित्यास्तटिन्यास्तीरभूमौसि
द्धसाध्याराध्यमानस्यस्फटिकलिंगस्यपश्चाद्द्विपतिकन्यापदपंक्तिचिह्नितस्याश्मनः १३
सविधेविधेराननमिवबिलंविद्यते· तत्रनिक्षिप्तंताम्रशासनंविधातुरिवशासनंसमादा

यविधिंतदुपदिष्टंदिष्टविजयमिवविधायपाताललोकाधीश्वरेणभवताभवितव्यंभवत्साहा
य्यकरोराजकुमारोपश्चोवासममागमिष्यतीति॰ तदादेशानुगुणमेवभवदागमनंमभूत्
साधनाभिलाषिणोममतोषिणारवयसाहाय्यमिति॰ तथेति राजवाहनःसाकंमातंगेनस
नमितोत्तमांगेनविहायार्द्धरात्रेनिद्रापरतंत्रंमित्रगणंवनांतरमवाप॰ तदनुतदनुचराःसाकल्ये
नराजकुमारमनवलोकयंते विषसाहृदयास्तेषुवनेपुसम्यग्विष्यानवेक्ष्यमाणाएतदन्वेष न्वि
णमनीषयादेशांतरंचरिष्णवोनिश्चितपुनःसंगमके+सं+तस्थानाःपरस्परंवियुज्ययुःलो
कैकवीरेणकुमारेणरक्ष्यमाणःसंतुष्टांतरंगोमातंगोपिबिलंशशिशेखरकथिताभिज्ञा
नपरिज्ञातंनिःशंकंप्रविश्यगृहीतताम्रशासनोरसातलपथातेनैवोपेत्यतत्रकस्यचित्पत्त
नस्यनिकटेकेलकाननकासारस्यविगतसारसस्यसमीपेनानाविधेनशासनविधानोपपादि

© Dharmartha Trust J&K. Digitized by eGangotri

दश· तेनहविषाहोमंविरच्यप्रत्यूहपरिहारिणिसविस्मलोकघतिराजवाहनेसमिद्धाज्यसमुज्ज्वलिते
१५ ज्वलनेपुण्यगेहंदेहंमन्त्रपूर्वकमाहुतीकृत्यतडिल्लतासमानकान्तिंदिव्यांतनुमलभत· तदनुम
15 णिमयमण्डनमण्डलमण्डितासकललोकललनाकुलललामभूताकन्यकाकाचनविनीताने
कसखीजनानुगम्यमानाकलहंसगत्यात्राग्यावनिसुरोत्तमायमणिमेकमुज्ज्वलाका
रमुपायनीकृत्यतेनकात्वमितिपृष्टासोल्कण्ठाकलकण्ठस्वनेनमन्दमुदञ्जलिरभाषतभूसुरोत्त
माहमसुरोत्तमनन्दिनीकालिन्दीनाममममपितास्यलोकस्यशासितामहानुभावोनिजपरा
क्रमासहिष्णुनाविष्णुनादूरीकृतामरेसमरेयमनगरातिथिरकारितद्वियोगशोकसागरम
ग्नामामवेक्ष्यकोपिकारुणिकःसिद्धतापसोऽभाषत· बालेकश्चिद्दिव्यदेहधारीमानवो १५
नवोवल्लभस्तवभूत्वासकलंरसातलंपालयिष्यतीति· तदादेशंनिशम्यघनशब्दोन्मु

© Dharmartha Trust J&K. Digitized by eGangotri

स्वीचातकीवर्षागमनमिवतत्वालोकनाकांक्षिणीविरमतिष्ठंमन्मनोरथफलायमानभवदा
गमनमवगम्यमद्राज्यावलेवनभूतामात्यानुमत्यामदनुकृतरथ्येनमनसाभवंतमागहं लोक
स्यास्मराज्यलक्ष्मीमंगीकृत्यमांतत्सपत्नीकरोतुभवानिति· मातंगोपिराजवाहनानुमत्या
तरुणीपरिणीयदिव्यांगनालाभेनहृदैहृतरोरसातलराज्यमुरीकृत्यपरमानंदमाससा
दवंचपित्वावयस्यगणंसामागतोराजवाहनः तदवलोकनकौतूहलेनभुवंगमितः का
लिंदीदत्तक्षुत्पिपासादिक्लेशनाशनमणिसाहाय्यकरणंसंतुष्टान्मातंगाल्लब्धहाकंचनाधानम
नुवर्तमानेतंविसृज्यबिलपथेननिर्ययौः तत्रचमित्रगणमनवलोक्यभुवंबभ्रामभ्रामंश्चविशालोप
शल्यकमध्याक्रीडमासाद्यतत्रविश्रामभिषुरांदोलिकारूढंरमणीसहितमाप्तजनपरिवृतमुद्याने
समागतमेकंपुरुषमद्रयत· सोपिपरमानंदेनपल्लवितचेताविकसितवदनारविंदोममस्वामी

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रा·
१५
15

सोमकुलावतंसो विशुद्धयशोनिधी राजवाहन एव महाभाग्यतयाऽकांड एवास्य पादमूलं गतवान
स्मि संप्रति महान्नयनोत्सवो जात इति ससंभ्रमं दोलिकाया अवतीर्य सरभसपदविन्याससवि
लासिहर्षोत्कर्षचरितः त्रिचतुः पदान्युद्गतस्य चरणकमलयुगलं गलदुल्लसन्मल्लिको चलयेन
मौलिना पस्पर्श प्रमोदाश्रुपूर्णो रामापुलकितांगं तं गाढमालिंग्याघ्राय सोमदत्त इति व्याज
हार ततः कस्यापि पुंनागभूरुहस्य प्रच्छायशीतले तले संविष्टेन मनुजनाथेन सप्रणयमभाणि·
सखे कालमेतावंतं देशेकस्मिन्नकारणकेनास्थापि भवता संप्रति कुत्र गम्यते· तरुणी
क्रियमेष परिजनः संपादितः कथं कथयेति· सोपि मित्रसंदर्शनव्यतिकरापगतचिंताज्वराति १५
शयो मुकुलितकरकमलः सविनयमात्मीयप्रचारप्रकारमवोचत इति दण्डिकृतौ दशकु
मारचरिते द्विजोपकृतिर्नाम द्वितीय उच्छ्वासः देव भवच्चरणकमलसेवाभिलाषीभूतोहं भ्रम

© Dharmartha Trust J&K. Digitized by eGangotri

नेकस्यांवनावनौपिपासाकुलोलतापरिहृतंशीतलंनदसलिलंपिबन्नुज्ज्वलारंरत्नंतत्रैकमद्राक्षं
तदादापगतांकेंचनाध्वानमतिक्रवरमृणेरतुम्यांमतयागंतुमक्षमोचवने ऽस्मिन्नेवकिमपिदे
वतायतनंप्रविष्टोदीनाननंचकूतनयसमेतंस्थविरमहीसुरमेकमवलोक्यकुशलमुदितदयोऽहम
पृच्छं कार्पण्यविवर्णवदनोमहदात्रापूर्णमानसोवोचदयमग्रजन्मामहाभागसुतानेतान्मातृहीना
ननेकैरुपायैरक्षन्निदानीमस्मिन्कुदेशेभैक्षंसंपाददन्नेभ्योचसामिन्निशिवालयेऽस्मिन्निति· भूदे
वएतत्कटकाधिपतीराजाकस्यदेशस्यकिंनामधेयः किमत्रागमनकारणमस्येतिपृष्टोऽभाष
तमहीसुरः सोम्यमत्तकालोनामलाटेश्वरोदेशस्यास्यपालयितुर्वीरकेतोस्तनयांवामलोचनांना
मतरुणीरत्नमसमानलावण्यंश्रावंश्रावमवधूतदुहितृप्रार्थनस्यतस्यनगरीमरौत्सीत्तः वीर
केतुरपिभीतोमहदुपायनमिवतनयांमत्तकालायादात तरुणीलाभहृष्टचेतालाटपतिः प

© Dharmartha Trust J&K. Digitized by eGangotri

दशा॰ रिणया निजपुरमेवेति निश्चित्यागच्छत् निजसैन्यं प्रति मृगयादरेणात्र वने सैन्यवासमकारयत् । कन्या
१६ सारेण नियुक्तो मानपालो नाम वीरकेतुमंत्री मानधनश्च तुरंगबलसमन्वितोन्यत्र रचितशिवि
रस्तल्लिजनाथावमानखिन्नमानसोंतर्बिभेदेति । विप्रोसौ बहुतनयो विद्वान् निर्द्धनः स्थविरश्च
10 दानयोग्य इति तस्मै करुणापूर्णमना रत्नमदां परमाह्लादविकसिताननो मिहितानेकाशीः
कुत्रचिदग्रजन्मा जगाम । अथाध्वश्रमखिन्नेन मया तत्र निरवेशि निद्रासुखं । तदनु पश्चाल्लिगलित
बाहुयुगलः सभूसुरः कशाघातचिह्नितगात्रोऽनेकनैस्त्रिंशिकानुपातोभ्येत्य मामसौ दस्यु
रित्यदर्शयत् । परित्यक्तभूसुरा राजभटा रत्नावाप्तिप्रकारं मदुक्तमनाकर्ण्य भयरहितं मां गाढं नि
यम्य रज्जुभिरानीय कारागारे मेतेन वसरवाय इति निगद्य तान्कांश्चिन्निर्दिष्टवंतो मामपि निगडि १६
तचरणयुगमकार्षुः । किं कर्तव्यतामूढेन निराशाक्रोशानुभवेनावाचि मया । ननु पुरुषा वीर्यपरु

© Dharmartha Trust J&K. Digitized by eGangotri

यानिमित्तेनकेननिर्विघ्नाप्यकारावासदुःखंदुस्तरंमूयंवयस्याइतिनिर्दिष्टमेतैः किमिदमिति तथा
विधंमाममवेक्ष्यभूसुरात्मजायाकृतेलाटपतिहन्नांतंव्याख्यायचोरवीराः पुनरवोचन् महाभागवी
रकेतुमंत्रिणोमानपालस्यकिंकरावयंतदाज्ञयालाटेश्वरमारण्यायरात्रौसुरुंगद्वारेणतदगारंप्र
विश्यतत्रराजाभावेनविषण्णाबहुधनमपहृत्यमहाटवीन्वैप्राविशाम अपरेद्युश्चपदान्वेषिणोराजा न्वे
नुचराबहवोऽभ्येत्यधृतधनचयान् अस्मान्परितः परिवृत्यदृढतरंबध्वानिकटमानीयसमस्तव
स्तुशोधनवेलायामेकस्यानर्घ्यरत्नस्याभावेनास्मद्वधायमाणिक्यादानायास्मान्किलाश्रृंखल
यन्नितिश्रुतरत्नकुलालोकनस्यानोऽहमिदंतदेवमाणिक्यमितिनिश्चित्यभूदेवदानमितितां
दुस्वस्थामात्मनोजन्मनामधेयंयुष्मदन्वेषणपर्यटनप्रकारंचाभाष्यतमयोचितैः संलापैर्मै
त्रीमकार्षं ततोर्द्धरात्रेतेषांममचश्रृंखलाबंधनंनिर्भिद्यतेरक्षगम्यमानोनिद्रितस्यद्वाःस्थ

© Dharmartha Trust J&K. Digitized by eGangotri

दश॰
१७
17

गणस्यसुधजातमादायपुरक्षान्मुरतोभिमुखागतान् पुपराक्रमलीलयाभिद्राव्यमानपालश्शिवि
रंप्राविशत्॰ मानपालोनिजकिंकरेभ्योममकुलाभिमानघ्नांततत्कालीनंविक्रमंचनिशम्यमा
मार्चयत्॰ परेद्युर्मन्त्रकालेनप्रेषिताःकेचनपुरुषाः मानपालमुपेत्यमंत्रिन्मदीयराजमंदिरेसुरुंगया
वहुधनमपहृत्यचौरवीराभवद्देशेकटकंप्राविशन्॰ तानर्पयनोचेन्महाननर्थःसंभविष्यतीतिक्रू
रतरंवाक्यमब्रुवन्॰ तदाकर्ण्यरोषारुणितनेत्रोमंत्रीलाटपतेः कस्तेनमैत्रीकापुरुषस्यवराक
स्यसेवयाकिंलभ्यमितितान्निरभर्त्सयत्॰ तेमानपालेनोक्तंविप्रलापंमन्त्रकालायतथैवाकथयन्॰
कुपितोपिलाटपतिर्दोर्वीर्यगर्वेणाल्पसेनिकसमेतोयोद्धुमभ्यगात्॰ पूर्वमेवकृतरणनिश्चयोमान
पालःसन्नद्धयोधोयुद्धकामोभूत्वानिःशंकंनिरगात्॰ अहमपिमत्वद्बुमानंमंत्रिदत्तानिचडुलतु १८
रंगमोपेतंचतुरसारथिंरथंचढ्ढ्रतरंकवचंमदनुरूपंचापंचविविधवाणापूरणंतूणीरद्वयंसमुपि

तान्यायुधानिगृहीत्वासुहृत्सन्नद्धोमदीयबलविध्वासेनरिपूहूरणोद्युक्तंमंत्रिणमन्वगां· परस्परम
त्सरेणतुमुलसंगरकरमुभयसैन्यमतिक्रम्यसमुल्लसद्भुजाटोपेनबाणवर्षंतदंगेविमुंचन्नरातीन्
न्नाहरं ततोतिरयतुरंगमंमद्रथंतन्निकटंनीलाब्जीघ्रलंघनोपेततदीयरथोहमरातेःशिरःकर्त्त
नमकार्षंतस्मिन्निपतितेतत्स्वविशिष्टसैनिकेषुपलायितेषुनानाविधहयगजादिवस्तुजातमादा
यपरमानंदसंभृतोमंत्रीममानेकविधांसंभावनामकार्षीतमौनपालप्रेषितान्नदनुचरोदनमखिल
मुदंतमाकर्ण्यसंतुष्टमनाराज्ञाभ्युदतोमहीपराक्रमेविस्मयमानःसमहोत्सवममात्यबांधवानु
मत्याशुभदिनेनिजतनयांमह्यमदात्· ततोयौवराज्याभिषिक्तोऽहमनुदिनमाराधितमहीपालचि
त्तोवामलोचनपानयासहनानाविधंसौख्यमनुभवन्भवद्विरहवेदनाशल्यसुलभवैकल्यहृद
यःसिधादेशेनमुहूर्तमनावलोकनफलप्रदेशंमहाकालनिवासिनःपरमेश्वरस्याराधनायाघ

© Dharmartha Trust J&K. Digitized by eGangotri

द॰क्रा· पत्नीसमेतः समागतोस्मि· भक्तवत्सलस्य गौरीपतेः कारुण्येन भवत्पादारविंदसंदर्शनानंदसंदोहो
१८ मयालब्ध इति· तन्निशाम्याभिनंदितपराक्रमो राजवाहनस्तन्निरपराधदंडे दैवमुपालभ्य तस्मै क्र
18 मेणात्मचरितं कथयामास· तस्मिन्नवसरे पुरतः पुष्पोद्भवं विलोक्य ससंभ्रमं निजनिटिलतटस्पृ
ष्टचरणांगुलिमुदंजलिममुं गाढमालिंग्यानंदबाष्पसंकुलसंफुल्ललोचनः सौम्य सोमदत्तोऽयं स
पुष्पोद्भव इति तस्मै तं दर्शयामास। तौ च चिरहृदुःखं विसृज्यान्योन्यालिंगनसुखमन्वभूतां ततस्त
स्यैव महीरुहस्य छायायामुपविश्य राजा मम भाग्यवता वयस्य भूसुरकार्यं करिष्युरहं मित्रगणो वि
दितार्थाः सर्वथां तत्कार्यं करिष्यंतीति निद्रितान्भवतः परित्यज्य निरगां· तदनु प्रबुद्धो वयस्यवर्गः
नि किमितिश्चित्य मदन्वेषणाय कुत्र गतवान्भवानेकाकी क्व गंतेति· सोपि ललाटतटचुंबदंजलिपु १८
टः सविनयं तमलपत इति दंडिविरचिते दशकुमारचरिते सोमदत्तचरितं नाम तृतीय उच्छ्वासः

© Dharmartha Trust J&K. Digitized by eGangotri

देवमहीसुरोपकारायैवदेवोगतवानितिनिश्चित्यापिदेवेनगंतव्यंदेशंनिर्णेतुमशक्नुवानोमित्रग
णःपरस्परंविसृज्यदिक्षुदेवमन्वेष्टुमगच्छतअहमपिदेवस्यान्वेषणायमहीमटन्कदाचिदंबरम
ध्यगतस्यांबरमणेःकिरणमसहिष्णुरेकस्यांगिरितटमहीरुहस्यप्रच्छायशीतलेतलेक्षणमुपा
विशं·ममपुरोभागेदिनमध्यसमयसंकुचितसर्वावयवांस्वकर्माकृतिंमानुषच्छायांनिरीक्ष्योन्मु
खोगगनतलान्महारयेणपतंतंपुरुषंकंचिदंतरालएवदयोपनतहृदयोहमवलंब्यशनैरवनि
तलेनिक्षिप्यदूरपातवीतसंज्ञंतंशिशिरोपचारेणविबोध्यशोकातिरेकेणोद्गतवाष्पलोचनं
तंभृगुपतनकारणमपृच्छंसोपिकररुहैरश्रुकणानपनयन्नभाषतःसौम्यमगधाधिनाथामा
त्यस्यपद्मोद्भवस्यात्मसंभवोरत्नोद्भवोनामाहं· वाणिज्यरूपेणकालयवनद्वीपमुपेत्यकामपिव
णिक्कन्यकांपरिणीयतयासहप्रत्यागच्छन्नंबुधौतीरस्यानतिदूरएवप्रवहणस्यमग्नतयास्व

© Dharmartha Trust J&K. Digitized by eGangotri

द॰श्रा॰ र्येषु निमग्नेषु कथं कथमपि दैवानुकूल्येन तीरभूमिमभिगम्य निजांगनावियोगदुःखार्णवे प्लवमा
१९ नोऽहं कस्यापि सिद्धतापसस्यादेशाद्द्वारेण घोरञ्चाहापनाभिकथं चित्रीत्वाद्दुरवस्थापारमनवेक्ष्यमा
19 णो गिरिपतनमकार्षमिति तस्मिन्नेवावसरे किमपि नारीकूजितमश्राषि॰ नूनं खलु समुचितमिदं यत्सि
द्धादिष्टे पतितनयमिलनेन विरहमसहिष्णुर्वैश्वानरं विशासीति। तन्निशाम्य मनोविदितजनकभावं तम
घादिषं। तात भवते विज्ञापनीयानि बहूनि संति॰ भवतु पश्चादखिलमाख्यातव्यं अधुना नारीकूजि
तमनुपेक्षणीयः मयाक्षणमात्रमत्र भवता स्थीयतामिति॰ तदनु सोऽहं त्वरया किंचिदंतरमगमं॰
तत्र पुरतो भ्रंपंकरज्वालाकुलहुतभुगवगाहनसाहसिकां मुकुलितांजलिपुटां वनितां कांचिद
वलोक्य ससंभ्रममनलादपनीय कूजंत्यास्तया सह मत्पितुरभ्यर्णमभिगमय्य स्थविरामवोचं वृ १९
द्धे भवति सा कुत्रत्या कांतारे निमित्तेन केन दुरवस्थानुभूयते कथ्यतामिति सा सगद्गदमवादीत पुत्रका

© Dharmartha Trust J&K. Digitized by eGangotri

लघवनद्वीपे कालगुप्तनाम्नो वणिजः कस्यचिदेषा सुता सुवृत्ता नाम रत्नोद्भवेन निजकांतेनागच्छं
तीजलधौ मग्ने प्रवहणे निजधात्र्या मयात्तह फलकमेकमवलंब्य दैवयोगेन कूलमुपेता आसन्नप्र
सवसमया कस्यांचिदटव्यामात्मजमसूत ममतु मंदभाग्यतया बाले वनमातंगेन गृहीते मत्तद्वितीयाप
रिभ्रमंती षोडशवर्षाणि नेतरं भर्तृपुत्रसंगमो भविष्यतीति सिद्धवाक्याद्विश्वासादेकस्मिन्नुरण्याश्रमे ता
वंतं समयं नीत्वा शोकमपारं सोढुमक्षमा समुज्वलिते वैश्वानरे शरीरमाहुतीकर्तुमुद्युक्तासीदिति
तदाकर्ण्य निजजननीं ज्ञात्वा तामहं देव प्रणम्य तस्यै मदुदंतमखिलमाख्याय धात्रीभाषणाकु
ल्लवदनं विस्मयविकसिताक्षं जनकमदर्शयं पितरौ तौ साभिज्ञानमवेत्यान्योन्यं ज्ञात्वा मुदितांतरात्मानौ
विनीतं मामानंदाश्रुवर्षेणाभिषिच्य गाढमाश्लिष्य शिरस्युपाघ्राय कस्यांचिन्महीरुहच्छाया
मुपाविशतां कथं निवसति महीवल्लभो राजहंसस्तु इति जनकेन पृष्टो हे तस्य राज्यच्युतिं त्वदीयज

द॰श॰ जनसंकलकुमारावाप्तिं तवदिग्विजयारंभं भवतोमातंगानुयानमस्माकंयुष्मदन्वेषणकारणं स
२० कलमभ्यधां ततस्तोकस्यविद्याश्रमेस्तुनेरस्थापयंततोदेवस्यान्वेषणपरायणोहमखिलकार्य
20 निमित्तंचित्तंनिश्चित्यभवदनुग्रहाल्लब्धस्यसाधकस्यसाहाय्यकरणादक्षंशिष्यगणंनिःपाद्य
विंध्यवनमध्येपुरातनपदनस्थानान्युपेत्यविविधनिधिसूचकानांमहीरुहाणामधोनिक्षिप्तान्व
सुपूर्णान्कलशान्सिद्धाञ्जनेनज्ञात्वारक्षिषुपरितःस्थितेषुखननसाधनेरुत्पाद्यदीनारानसंख्या
न्राशीकृत्यतत्कालागतमनतिदूरेनिवेशितंवणिक्कटकंकंचिदभ्येत्यतत्रबलिनोबलीवर्दान्
गोणीश्चक्रीत्वान्यद्रव्यमिषेणवसुसंपूर्णागोणीसंवि।तैरुह्यमानंशनैःकटकमनयंतदधिकारि
णाचन्द्रपालेनकेनचिद्वणिक्पुत्रेण विरचितसौहार्दोऽहममुनैवसाकमुज्जयिनीमुपाविशं॰ २०
मत्पितरावपितांपुरीमभिगमय्यसकलगुणनिलयेनबंधुपालनाम्नाचन्द्रपालजनकेननीयमानो

© Dharmartha Trust J&K. Digitized by eGangotri

मालवनाथदर्शनं विधीयतदनुमत्या गूढवसतिमकरवं ततः काननभूमिषु भवंतमन्वेष्टुमुद्युक्तं मां
परममित्रं बंधुपालो निशम्यावदत् सकलधरणीतलमपारमन्वेष्टुमक्षमो भवान् मनोऽस्मान्निं विहा
य तत्स्थलीतिष्ठतु भवन्नायकालोकने कारणं शुभशाकुनं निरीक्ष्य कथयिष्यामीति तत्कल्पिताश्व
श्वासितहृदयोऽहमनुदिनं तदुपकंठवर्ती कदाचिदिंदुमुखीं नवयौवनवलीढावयवां नयनचंद्रिकां नाम मत
रुणीं त्ववणिक्कुमरिरलक्ष्मीमूर्त्तामवलोक्य तदीयलावण्यावधूतवीरभावो लतांतबाणबाणलक्ष्य
तामयासिषं चकितबालकुरंगलोचना साऽपि कुसुमसायकसायकायमानेन कटाक्षवीक्षणेन
न मामसकृन्निरीक्ष्य मंदमारुतांदोलिता लतेवाकंपत मनसाभिमुखैः समाकुंचितै रागलज्जां
तरालवर्त्तिभिः सांगवर्त्तिभिरीक्षणविशेषैर्निजमनोवृत्तिमकथयम् चतुरगूढचेष्टाभिरस्याम
नोऽनुरागं सम्यक् ज्ञात्वा सुखसंगमोपायमचिंतयं अन्यदा बंधुपालः शाकुनैर्भवद्गतिं प्रेक्षिष्य

© Dharmartha Trust J&K. Digitized by eGangotri

दशा· मारःपुरोपांतविहारवनंमयासहोपेत्यकस्मिंश्चिन्महीरुहे शकुंतवचनानिशृण्वन्नतिष्ठत् अ
२१ हमुत्कलिकाविनोदपरायणावनांतेपरिभ्रमन्तीसरोवरतीरेचिंताक्रांतचित्तंदीनवदनंमन्म
नोरथैकभूमिंबालचंद्रिकंव्यलोकयंतस्याःससंभ्रमप्रेमलज्जाकौतुकमनोरमंलीलावि
लोकनसुखमनुभवन्सुदत्यावदनारविंदेविषमभावंमदनकदनखेदानुभूतंज्ञात्वातन्नि
मित्तंज्ञा लीलयातदुपकंठमुपेत्यावोचिवं· स्मुखितवमुखारविंदस्यदैन्यकारणंकथये
ति· सारहस्यसंजातविश्रंभतयाविहायलज्जाभयेशनैरभाषत· सौम्यमानसारोमान
सारोमालवाधीशोवाहुकस्यप्रबलतयानिजनंदनंदर्पसारमुज्जयिन्यामभ्यषिंचत्· स
कुमारःसप्तसागरपर्यंतमहीमंडलंपालयिष्यन्निजपैतृष्वसेयावुदंडकर्माणौचंडवर्मदा
रुवर्माणौधरणीभरणेनियुज्यतपश्चरणायराजागिरिमभ्यगात्· राज्यंसर्वमसपत्नंशास २१

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिधर्मवर्म्मणा दारुवर्म्मा मातुलाग्रजन्मनोः शासनमतिक्रम्य पारदार्यपरद्रव्यापहरणादि
दुःकर्मकुर्व्वाणो मन्मथसमानस्य भवतो लावण्यायत्तचित्तां मामेकदा विलोक्य कन्यादूषणा
दोषं हरीकृत्य बलात्कारेण रंतुमुद्युङ्क्ते· तच्चिंतया दैन्यमगच्छमिति तस्या मनोगतमपि रागोद्रे
कं मन्मनोरथसिद्ध्यंतरायं च निशम्य वाष्पपूर्णलोचना मामास्वास्य दारुवर्म्मणो मारणोपायं
च विचार्य वल्लभामवोचं· तरुणि भवदभिलाषिणं दुष्टहृदयमेनं निहंतुमृदुरुपायः कश्चिन्मया
चिंत्यते· यक्षः कश्चिदधिष्ठाय बालचंद्रिकां निवसति तदाकारसंपदाकृष्टं स्खलितहृदयो
यः संबंधयोग्यः साहसिको रतिमंदिरे तं यक्षं निर्ज्जित्य तयैकसखीसमेतया मृगाक्ष्या संला
पामृतसुखमनुभूयपानिर्गमिष्यति· तेन चक्रवाकसंज्ञायाकारपयोधरा विवाहनीयेति सिद्धे
नैकेनावादीति पुरजनस्य पुरतो भवदीयैः सत्यवाक्यै रसकृत्कथनीयं· तदनु चारुवर्म्मावाक्या

© Dharmartha Trust J&K. Digitized by eGangotri

द्य॰ नीत्थंविधानिश्रावंतलक्ष्मीयदिमियास्थास्यतितर्हिवरंयदिगादोर्जन्येनत्वयासंगमंगीक
२२ रिष्यतितदासमभवदीयेरित्थंवाच्यः सौम्यरूपसारसुधाधिपामात्यस्यभवतोस्मिन्निवासे
22 साहसकरणमनुचितंपौरजनसाक्षिकंभवन्मंदिरमानीतयानयातोयज्ञाक्ष्यासहक्री
डन्त्यायुष्मान्यदिभविष्यतितदापरिणीयतरुणींमनोरथोर्विशेतिः सोप्यतदंगीकरिष्य त्रि ४
तित्वंसखीवेषधारिणामयासहतस्यमंदिरंगच्छ अहमेकांतनिकेतने मुष्टिजानुपदा
घातैस्तंरभसान्निहत्यपुनरपितवयस्यामिषेणाभवतीमनुनिः शंकं निर्गमिष्यामितदेनमुपायमं
गीकृत्यकारणेताननुनयैः तेपिवंचनसंपल्लावण्याद्यायपूनेमत्वंत्वांदास्येत्येवदारुवर्मणोमरणो
पायंतेभ्यः कथयित्वातेषामुत्तरमारब्धंयमत्यमितिः सापिकिंचिदुत्फुल्लसरसिजाननानामामव २२
वीतः सुभगाक्रूरकर्माणंदारुवर्माणंभवानेवहंतुमर्हतिः तस्मिन्हतेसर्वथायुष्मन्मनोरथः

© Dharmartha Trust J&K. Digitized by eGangotri

फलिष्यतिः एवंक्रियतांभवदुक्तंसर्वमहमपितथाकरिष्य इतिमामसकृद्दृष्टनवदनाविलोक
यंतीमंदमगारमगात् अहमपिबंधुपालमुपेत्यशकुनज्ञात्तस्मात्त्रिंशद्दिवसानंतरमेवभवत्संगः
संभविष्यतीत्यश्रृणवंतदनुमदनुगम्यमानोबंधुपालोनिजावासंप्रविश्यमामपिनिलयाय
विससर्ज मन्मायोपायवागुरायाबालेनेनदारुवर्मणारतिमंदिरेरंतुसमाहूताबालचंद्रि
कातंगमिष्यंतीत्यतिकांमन्निकटमभिप्रेषितवती अहमपिमणिनूपुरमेखलाकंकणकटं
कहारक्षौमकज्जलंवनितायोग्यमंडनजातंनिपुणतयातत्तत्स्थानेषुनिक्षिप्यसम्यगंगीकृत
मनोज्ञवेषोवल्लभयातयासहतदागारद्वारोपांतमगच्छं द्वाःस्थकथितास्मदागमनेनसादरंविहिता
भ्युद्गतिनातेनद्वारोपांतनिवारिताशेषपरिचारेणमदन्विताबालचंद्रिकासंकेतागारमनीयततेन
गरव्याकुलायक्षकथांपरीक्षन्नागरिकजनोपिकुतूहलेनदारुवर्मणः प्रतीहारभूमिमगमत्

© Dharmartha Trust J&K. Digitized by eGangotri

द्वा· विवेकशून्यमतिरसौ रागातिरेकेण रत्नखचितं हेमपर्यंकं हंसतूलगर्भशयनमानीय तरुणी तस्यै
२३ मत्वं तमिस्रामम्यगनवलोकितपुंभावायमनोरमस्त्रीवेषाय च चामीकरमयमंडनानि सूक्ष्मा
23 णि चित्रवस्त्राणि कस्तूरिकामिलितहरिचंदनं कर्पूरसहितं तांबूलं सुरभीणि कुसुमानि ललितं
वस्तुजातं समर्प्य मुहूर्त्तद्वयमात्रं हासवचनैः संलपन्ती तिष्ठति· ततो रागांधतया सुमुखी कचग्रह
णमतिव्यथन्नरोषारुणितो हेमनं पर्यंकतलान्निःशंको निपात्य मुष्टिजानुपदाघातैः प्राहरं नि
मुद्गरमसाविकलमलंकारं पूर्ववदुन्मील्यपि त्वाभयकंपितां नतांगीमुपलाहूयन् मंदिरांगणामु
पतः साध्वसकंपितइवोच्चैरकूजं हा बालचंद्रिकाधिष्ठितेन घोराकारेण यक्षेणादारुचर्माणि
हन्यते· सहसा समागच्छत पश्यतेति· तदाकर्ण्य मिलिता जनाः समुद्यद्बाष्पा हाहा हानिनादेन २३
दिशो बधिरयंतो बालचंद्रिकामधिष्ठितं यक्षं वतं रावन्नपि दारुचर्ममंदाध स्तामेवायाचत तद

© Dharmartha Trust J&K. Digitized by eGangotri

सोस्वकीयेनकर्मणानिहतः किंतस्यविलापेनेतिधैर्यमवलंब्यततः प्राविशान्· कोलाहलेतस्मिन्नुच
च्चलल्लोचनयामहृष्टेनपुष्पेनसहसानिर्गतोनिजावासमगात ततोगतेषुकतिपयदिनेषुपौरजनसम
क्षंसिद्धादेशप्रकारेणविवाह्यतामिंदुमुखींपूर्वसंकल्पितान्सुरतविशेषाणियथेष्टमन्वभवं
बंधुपालशकुननिर्दिष्टेदिवसेस्मिन्निर्गत्यपुराद्वर्त्तमानोनेत्रोत्सवकारिभवदवलोकनसुखम
नुभवामीति एवंमित्रवृत्तांतंनिशम्याम्लानमानसोराजवाहनः स्वस्यचसोमदत्तस्यचवृत्तांत
मस्मैनिवेद्यसोमदत्तंमहाकालेश्वराराधनानंतरंभवद्वल्लभांसपरिवारांनिकटंप्रापय्याग
च्छेतिनियुज्यपुष्पोद्भवेनसेव्यमानोभूस्वर्गायमाणमवंतिकापुरंविवेश· तत्रायंममस्वामि
कुमारइतिबंधुपालादयेबंधुजनायकथयित्वातेनराजवाहनायबहुविधांसपर्यांकारयन्सक
लकुशलोमहीसुरइतिपुरिप्रकटयन्पुष्पोद्भवोमुष्यराज्ञोमज्जनभोजनादिकमनुदिनंस्व

© Dharmartha Trust J&K. Digitized by eGangotri

दशा॰ मंदिरेकारयामास ॥ ॥ इतिदंडिनःकृतौदशकुमारचरितेपुष्पोद्भवचरीतंनामचतुर्थउच्छ्वासः
२५ अथमीनकेतनसेनानायकेनमलयानिलेनवियोगिहृदयस्थमन्मथानलमुज्ज्वलयन्सहकार
५५ किसलयमकरंदास्वादनरक्तकंठानांमधुकरकलकंठानांकाकलीकलकलेनदिक्चक्रंवाचाल
यन्मानिनीमानसोत्कलिकामुपनयन्माकंदसिंदुवाररक्ताशोककिंशुकतिलकेषुकलिकामु
पपादयन्मदनमहोत्सवायरसिकमनांसिसमुल्लासयन्वसंतसमयःसमाजगाम॰ तस्मिन्नति
रमणीयेकाले॰ अवंतिसुंदरीनाममानसारनंदिनीप्रियवयस्ययाबालचंद्रिकयासहनगरोपांत
रम्योद्यानेविहारोत्कंठयापौरसुंदरीसमवायसमन्विताकस्यचित्तरुतपोतकस्यछायाशीत
लेसैकततलेगंधकुसुमहरिद्राक्षतचीनांबरादिनानाविधेनपरिमलद्रव्यनिकरेणमनोभवम २५
र्चयंतीरेमेतत्ररतिप्रतिकृतिमवंतिसुंदरींदृष्ट्वाकामःकामइववसंतसहायःपुष्पोद्भवसमन्वि

© Dharmartha Trust J&K. Digitized by eGangotri

ततो राजवाहनस्तदुपवनं प्रविश्य तत्र तत्र मलयमारुतांदोलितशाखानिरंतरसमुद्भिन्नकिसलयकु
सुमफलसमुल्लासितेषु रसालतरुषु कोकिलकीरालिमधुकराणामालापात् आवश्रावं विकसि
तेंदीवरकल्हारकैरवराजीवराजिकेलिलोलकलहंससारसकारंडवचक्रवाकचक्रवालकलरवव्या
कुलविमलशीतलसलिललिलितानि सरांसि दर्शं दर्शं मंदलीलया ललनासमीपमवाप बा
लचंद्रिकया निःशंकमितः आगम्यतामिति हस्तसंज्ञया समाहूतो निजतेजोजितपुरुहूतो राज
वाहनः कृशोदर्याः अंतिकं जगाम । यावद्वसंतसहायेन समुत्सुकतया रतेः केलीस्थल
मंजिकाविधित्सया कंचन नारीविशेषं विरच्यात्मनः क्रीडाकासारशारदारविंदसौंदर्येणापा
दद्वयमुद्यानवनदीर्घिकामत्तमरालिकागमनरीमालीलालसगतिविलासं तूणीरलावण्येन
जंघे लीलामंदिरद्वारकदलीलालित्येन मनोज्ञमूरुयुगं जैत्ररथचातुर्येण घनं जघनं किंचिद्द

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्वा·
कमल्लीलावतंसकह्लारकोरककोटरानुद्रूत्यागंगावर्त्तसनाभिंनाभिंसौधारोहणपरिपाघाव
२५ लित्रयंमौर्वीमधुकरपंक्तिनीविमलीलयारोमावलिंपूर्णसुवर्णकलशशोभयाकुचद्वंद्वंल
25 तामडपसौकुमार्यणावाहूजयशाखाभिरव्ययाकंठंकाभिकर्णपूरसहकाकलकंठिकाक
लालापमाधुर्यणावचनजातंसकलसैनिकनायकमलयमारुतसौरभ्येणनिश्वासपवनंज
मीन ५ यध्वजैर्य्यदर्पणलोचनयुगलंचापयष्टिभ्रियाभ्रूलतेप्रथमसुहृदःसुधाकरस्यापनीतक
लंकयाकांत्यावदनंलीलामयूरबर्हभंग्याकेशपाशंचविधायसमस्तमकरंदकस्तूरिकासं
मितेनमलयजरसेनप्रक्षाल्यकर्पूरपरागेणसंमृज्यनिर्मितेवराजसामूर्त्तिमतीवलक्ष्मीर्मल
वेशकन्यकासुनैवाराध्यमानंसंकल्पितवरप्रदानायाविर्भूतमूर्त्तिमंतेमन्मथमिवतमालो २५
कयमंदमारुतांदोलितालतेवमदनावेशावतीचकंपेतदनुक्रीडाविश्रंभान्निर्वृत्तालज्जयाका

© Dharmartha Trust J&K. Digitized by eGangotri

निकान्यपिभावांतराणिव्यधत्तः ललनाजनंसृजताविधात्रानूनमेषाघुणाक्षरन्यायेननिर्मिता·
नोचेदब्जभूरेवंविधनिर्माणनिपुणोयदिस्यात्तत्समानलावण्यामन्यांतरुणींकिंनकरोतीति
सविस्मयानुरागंविलोकयतस्तस्यसमक्षंस्थातुंलज्जितासाकिंचित्सखीजनांतरितगात्रा
तन्नयनाभिमुखैःकिंचिदाकुंचितैरंचितभ्रूलतैरपांगवीक्षितैरात्मनः कुरंगस्यानायमा
नलावण्यराजवाहनंविलोकयंतस्तिष्ठत्· साऽपितस्यास्तदोत्पादितभावरसानांसामग्र्यालब्ध
बलस्येवविषमशरस्येशरव्यायमानमानसोबभूव सामनसीत्थमचिंतयत् अनन्यसाधारण
सौंदर्येणानेनकस्यांपुरिभाग्यवतीनांलोचनोत्सवःक्रियते· पुत्ररत्नेनामुनापुरंध्रीणांपुत्र
वतीनांसीमंतिनीनांकानामसीमंतमौक्तिकंक्रियते· कास्यदेवीकिमन्त्राकारणमस्यमन्मथोमा
मपहसितनिजलावण्यमेनंविलोकयंतीमसूययेवातिमात्रंमथ्नन्निजनामसमान्वयंकरोतिकिंक

© Dharmartha Trust J&K. Digitized by eGangotri

द॰श्रा॰ रोमिकथमयं त्वातव्य इति · ततो बालचंद्रिका तयोरंतरंगहृन्निर्भावविवेकेर्तीलाकांता समाजसे
२६ निधो राजनंदनो रंतस्य सम्यगाख्यानमनुचितमितिलोकसाधारणे वाक्ये रभावतम्र्त्तदारिके ऽ
26 यं सकलकलाप्रवीणो देवतासांनिध्यकरणश्चाहवनिपुणोभूस्तुरकुमारो मणिमंत्रौषधज्ञः परि
चर्याहीं भवत्याः पूज्यतामिति · तदाकर्ण्य निजमनोरथमनुवदंत्या बालचंद्रिकया संतुष्टांतरंगा
तरंगावली मंदानिलेनेव संकल्पजेनाकुलीकृता राजकन्यानितमारं कुमारं समुचितासतासी
नं विधाय सखीहस्तेन त्रास्तेन गंधकुसुमाक्षतघनसारतांबूलादिनानानावस्तुनिचयेन पू
जां तस्मै कारयामास राजवाहनोप्येवमचिंतयत् नूनमेषा पूर्वजन्मनि मे जायायत्नवती नो चेदे
तस्यामेवंविधोनुरागो मन्मनसि न जायेत · शापावसान समये तपोनिधिर्जातिस्मरत्वमावयोः २६
समानमेव तथापि कालजनितविशेषसूचकैर्वाक्यैरस्याज्ञानमुत्पादयिष्यामि · तस्मिन्ने

© Dharmartha Trust J&K. Digitized by eGangotri

वसमयेएकोपिमनोरमोराजहंसः केलीविधित्सयातदुपकंठमगमत् समुत्सुकयाराजकन्ययाम
रालग्रहणेनियुक्ताबलचंद्रिकामवलोक्यसमुचितोवाक्यावसरएषइतिसंभाषणनिपुणोराज
वाहनःसलीलमलयत् सरिवपुरसंवोवोनामकश्चिन्महीवल्लभोमनोवल्लभयासहविहारवां
छयाकमलाकरमवाप्यतत्रकोकनदकदंबसमीपेनिद्राधीनमानसंराजहंसंशनैर्गृहीत्वाबिस
गुणेनतस्यचरणयुगलंनिगडयित्वाकांतामुखस्यानुरागंविलोकयन्मंदस्मितविकसितक
पोलमंडलस्तामभाषत इंदुमुखिमयाबद्धोमरालः शांतोमुनिवदास्तेस्वेच्छयानेनगम्यतामिति·
सोपिराजहंसः शापमशपत्· महीपालपदस्मिन्नंबुजषंडेऽनुष्ठानपरायणतयापरमानंदेनति
ष्ठंतंनैष्ठिकंमामकारणराज्यगर्वेणावमानितवानसितदेततस्मात्त्वमनारमणीविरहसंतापमनु
भवेति· विषण्णवदनः संवोवाजीवितेश्वरीविरहमसहिष्णुर्भूमौदंडवत्प्रणम्यसविनयमभाषत

© Dharmartha Trust J&K. Digitized by eGangotri

महाभागपदत्राणेनेनाकरवंतत्क्षमस्वेति· सतापसः करुणाकृष्टचेतास्तमवदत· राजन्निह
जन्मनिभवतः शापफलाभावोभवतु· मद्वचनस्यामोघतयाभाविनिजननेशारीरांतरगताया
अस्याः सरसिजाक्ष्यारसेनमुहूर्तद्वयमच्चरणयुगलबंधनकारितयामासद्वयंश्रृंखलनिग
लितचरणेरमणीवियोगविषादमनुभूयपश्चादनेककालंवभयामद्राज्यसुखंलभस्वेति त
दनुजातिस्मरत्वमपितपोरनुग्रहात तस्मान्मरालबंधनंनकरणीयंत्वयेति· सापिमर्त्यदारिका
तद्वचनाकर्णनाभिज्ञातस्वपुरातनजननवृत्तांतातम्प्रयंमत्प्राणवल्लभइतिमनसिजानतीरा
गपल्लवितमानसासमंदहासमवोचत· सौम्यपुराहंचोयंहंसवतीसंदेशपरिपालनायत
थाविधंहंसबंधनमकार्षीत तथाहिलोकेपंडिताअपिदाक्षिण्येनाकार्यंकुर्वंतीतिकन्या २८
कुमारावन्योन्यपुरातननामधेयपरिचिताः परस्पराज्ञानायसाभिज्ञमुक्त्वामनोजरागपूर्ण

© Dharmartha Trust J&K. Digitized by eGangotri

मानसौधमभूवतुः तस्मिन्नेवावसानेमालवेंद्रमहिषीपरिजनपरिवृतादुहितृकेलीविलोकनायतंदे
शमवाप बालचंद्रिकातुतांविलोक्यससंभ्रमंरहस्यनिर्भेदभियाहस्तसंज्ञयापुष्पोद्भवस्यमाने
राजवाहनंवृक्षवाटिकांतरितगात्रमकरोत् सोमानसारमहिषीसखीसमेतायादुहितुर्ना
नाविधांविहारलीलामनुभवंतीक्षणंस्थित्वानिजागारगमनायोयुक्ताबभूवमातरमनुग
छंत्यवंतिसुंदरीराजहंसकुलतिलकविहारवांछयाकेलीवनमेनो नेमदंतिकमागतंभवंतम
कांडएवविसृज्यमयासमुचितमितिजनस्यनुगमनंक्रियतेतदनेनभवन्मनोनुरागोन्यथा
माभूदितिमरालमिवकुमारमुद्दिश्यसमुचितालापकलापंवदंतीपुनः परिवृत्तदीननय
नावरनंविलोकयंतीनिजमंदिरमगात् तत्रहृदयवल्लभकथाप्रसंगेबालचंद्रिकाकथित
तदन्वयनामधेयामन्मथबाणपतनव्याकुलमानसाविरहवेदनयाबहुलपक्षशशिकले

© Dharmartha Trust J&K. Digitized by eGangotri

दश· वक्षामक्षामक्षामा हारादिसकलव्याहारादिसकलव्यापारं परिहृत्य रहस्यमंदिरे मलयजरस
२८ क्षालितपल्लवकुसुमकल्पिततल्पतल्लोपघ्नतनुलताव भूव· तत्र तथाविधावस्थां भवंतीमन्मथा
28 नलसंतप्तांसुकुमारीं· कुमारीं निरीक्ष्य खिन्नो वयस्यागणः कांचनकलशमयानितालवृंता
निचसंतापहरणानि बहूनि संपाद्य तस्याः शरीरमशिशिरयत्· तदपि शीतलोपकरणं स
लि[redacted]+ शसंचितानि हरिचंदनोशीरघनसारमिलितानि तदभिषेककल्पितानि सलि
लानि बिसतंतुमयानि वासांसि चनलिनीदल+ लमिव तप्ततैलेन तदंगे दहनमेव समंतादा
विश्चकार· किं कर्त्तव्यतामूढां विषण्णां बालचंद्रिकामीषदुन्मीलितेन कटाक्षवीक्षितेन बा
ष्पकणाकुलेन विलोक्य विरहानलोष्मनिःश्वाससंतापिताधरया नतांग्या शनैः सगद्गदं व्यला २८
पि· प्रियसखि कामः कुसुमायुधः पंचबाण इति नूनमसत्यमुच्यते· इयमहमसंख्यैरिषुभि

© Dharmartha Trust J&K. Digitized by eGangotri

रनेन हन्ये सखि चंद्रमसं वडवानलादतितापकरं मन्ये· यदस्मिन्नंतः प्रविशति शुष्यति पारावा

रः सति निर्गते तत देववर्द्धते· दोषाकरस्य दुष्कर्म किं वर्ण्यते मया यदानेन निजसहोदर्याः पद्मात

यायागेहभूतमपि कमलं हन्यते· विरहानलसंतप्तहृदयस्पर्शेन नूनमुष्णीकृतः स्वल्पी भवति म

लयानिलः· नवपल्लवकल्पितं तल्पमिदमनंगाग्निशिखापटलमिव संतापं तनोस्तनोति· हरि

चंदनमपि पुरा निजयष्टिसंश्लेषवद्दुरगरदनलिप्तोल्वणगरलसंकलितमिव तापयति शरी

रं· तस्मादलमलमायासेन शीतलोपचारैर्लावण्यजितमन्मथो राजकुमार एवागदंकारो म

न्मथज्वरापहरणे सोपि लघु मशक्यो मया किं करोमी· निवालचंद्रिका मनोजज्वर एव स्थापर

मकाष्ठां गतां कोमलांगीं तां राजवाहनलावण्याधीनमानसामनन्यशरणामवेक्ष्यात्मन्य

चिंतयत्· कुमारः सत्वरमनेन व्याजेन यामनो चेदेनां स्मरशरणीयां गतिं नयिष्यति मीनकेतनः तत्रो

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रा॰ २९ 29

यानेकुमारयोरन्योन्यावलोकनवेलायामसममसायकः समंमुक्तसायकोऽभूत्॰ तस्मात्कुमारानय
नंसत्कुरु॰ ततोवतीसुंदरीरक्षणायसमभ्योवितर्करणीयचतुरंसखीगणंनियुज्यराजकुमारमंदि
रमवाप॰ पुष्पबाणबाणातूणीरायमाणमानसोऽनंगतप्तावयवसंपर्कपरिम्लानपल्लवशयनमधि
ष्ठितोराजवाहनुःमाणीश्वरीमुद्दिश्यसहपुष्पोद्भवेनसंलपन्नागतांप्रियवयस्यामालोक्यपादमूल
मन्वेषणीयालेनेवबालचंद्रिकागतेतिसंतुष्टमनाः निटिलतटमेऽनीभवदंबुजकोरकाकृतिल
सदंजलिपुटामिमांनिषीदेतिनिर्दिश्यसमुचितासनासीनामवंतिसुंदरीप्रेषितंसकर्पूरतांबूलंवि
नयेनददतींतांकांताद्वृत्तांतमपृच्छत्॰ तयासविनयमभाणि॰ देवक्रीडावनेभवदवलोकनकालेमा
रभ्यमन्मथमथ्यमानापुष्पतल्पादिषुतापशमनमलब्धवतीवामनेनेवोन्नततरुफलमलभ्यंत्व
दुरःस्थलालिंगनसौख्यंस्मरीधतयालिप्तुःसास्वयमेवपत्रिकामालिख्यवल्लभायैनामर्पये २९

त्तिमां नियुक्तवती· राजकुमारः पत्रिकां तामादाय पपाठ· सुभग कुसुमसुकुमारं जगदनवद्यं विलो
क्य ते रूपं· मम मानसमभिलषति त्वं चित्तं कुरु तथा मृदुलं· इति पठित्वा सादरमभाषत· सखि ब्रू
यावन्मामनुवर्त्तमानस्य पुष्पोद्भवस्य वल्लभा त्वमेव तस्या मृगीदृशो बहिश्चराः प्राणा इव वर्त्तसे
त्वच्चातुर्यमस्यां क्रियायामालवालमभूत्· तदखिलं करिष्यामि न तां ग्यामन्मनः काठिन्यमा
ख्यातं यदा केलीवने कुरंगनयना लोचनपथमवर्त्तत तदैवापहृतमदीयमानसा सा स्वमंदिरमगात्·
सा चेतसो माधुर्यकाठिन्ये स्वयमेव जानाति· दुःकरं कन्यांतःपुरप्रवेशस्तदनुरूपमुपायमुपपाद्य
श्वः परश्वो वा नतांगीं संगमिष्यामि· मदुदंतमेव माख्याय शिरीषकुसुमसुकुमाराया यथा शरीरबाधा
न जायेत तथाविधमुपायमाचरेति· बालचंद्रिकापि तस्य प्रेमगर्भितं वचनमाकर्ण्य संतुष्टा कन्यापु
रमगच्छत्· राजवाहनोपि यत्र हृदयवल्लभावलोकनसुखमलभत तदुद्यानं विरहविनोदाय पुष्पो

© Dharmartha Trust J&K. Digitized by eGangotri

दश.
३०
30

द्भवसमन्वितोजगाम· तत्रचकोरलोचनावचितापल्लवकुसुमनिकुरुंबंमहीरुहसमूहंशरदिंदुमुखा
मन्मथसमाराधनस्थानंचनतांगीपदपंक्तिचिह्नितंशीतलसैकततलंवसुदतीभुक्तमुक्तंमाधवील
तामंडपांतरपल्लवानिमदनाग्निशिखाइवचकितोदर्शंदर्शंमनोजकर्णेजपानामिवकोकिलकीर
मधुकराणांक्वणितानिश्रावंश्रावंमारविकारेणाक्वचिदप्यवस्थातुमसहिष्णुःपरिबभ्राम·त
स्मिन्नवसरेधरणीसुरएकःसूक्ष्मचित्रनिवसनःस्फुरन्मणिकुंडलमंडितोमुंडितमस्तकमा
नवसमेतश्चतुरवेषमनोरमोयदृच्छयासमागतःसमंततोभ्युल्लसत्तेजोमंडलंराजवाहनमाशी
र्वादपूर्वकंददर्श· राजासादरंकोभवान्कस्यांविद्यायांनिपुणइतितंपप्रच्छ· सचविद्येश्वरना
मधेयोहमैंद्रजालिकविद्याकोविदोविविधदेशेषुराजमनोरंजनायभ्रमन्नुज्जयिनीमद्यागतो
स्मीतिशशंस· पुनरपिराजवाहनंसम्यगालोक्याऽस्यांलीलावनौपांडुरतानिमित्तंकिमितिसा ३०

© Dharmartha Trust J&K. Digitized by eGangotri

भिप्रायं विहस्यापृच्छत्। पुष्पोद्भवश्चैन्द्रजालिके निजकार्यकरणं तर्कयन्तेनयादरेण बभाषे। ननु सतां स
ख्यस्याभाषणपूर्वतया चिरं रुचिरभाषणो भवानस्माकं प्रियवयस्यो जातः। सुहृदामकथ्यं च किम
स्ति। केलीवनेऽस्मिन्वसंतमहोत्सवायागताया मालवेन्द्रसुताया राजनंदनस्यास्य चाकस्मिकसं
दर्शनेनान्योन्यानुरागातिरेकः समजायत। सततसंभोगसिध्युपायाभावेनासावीदृशीमवस्थामनुभ
वतीति। विद्येश्वरो लज्जाभिरामं राजकुमारमुखमभिवीक्ष्य विरचितमंदहासो व्याजहार। देव भव
दनुचरे मयि तिष्ठति तव कार्यमसाध्यं किमस्ति। अहमिन्द्रजालविद्यया मालवेन्द्रं मोहयन्पौरज
नसमक्षमेव तत्तनयापरिणयं रचयित्वा कन्यांतःपुरं प्रवेशं करिष्यामीति। वृत्तांत एव राजकन्या
यै सखीमुखेन पूर्वमेव कथयितव्य इति। संतुष्टमना महीपतिरनिमित्तमित्रे प्रकटीकृतकृत्रिम
क्रियापाटवं विप्रलंभकृत्रिमप्रेमसहजसौहार्दवेदिनं तं विद्येश्वरं सबहुमानं विससर्ज। अ

© Dharmartha Trust J&K. Digitized by eGangotri

द॰कु॰ थराजवाहनो विद्येश्वरस्य क्रियापाटवेन फलितमिव मनोरथं मन्यमानः पुष्पोद्भवेन सह स्वमंदिरमु
३१ पेत्य सादरं बालचंद्रिकामुखेन निजवल्लभायै माहीसुरक्रियमाणां संगमोपायं वेदयित्वा कौतुका
31 कृष्टहृदयः कथमिमां क्षपां क्षपयामीत्यतिष्ठत् ॰ परेद्युः प्रभाते विद्येश्वरो रसभावगीतिरीतिगतिच
तुरस्तादृशेन महता निजपरिजनेन सह राजभवनद्वारांतिकमुपेत्य दौवारिकनिवेदितनिजवृत्तांतः
सहसोपगम्य सप्रणाममैंद्रजालिकः समागत इति द्वाःस्थैर्विज्ञापितेन तद्दर्शनकुतूहलावि
ष्टेन समुत्सुकावरोधसहितेन मालवेंद्रेण समाहूयमानो विद्येश्वरः कक्ष्यांतरं प्रविश्य सविन
यमाशिषं दत्वा तदनुज्ञातः परिजनताड्यमानेषु वाद्येषु नदत्सु गायकीषु मदकलकोकिलाम
ञ्जुलध्वनिषु समधिकरागरंजितसामाजिकमनोवृत्तिषु पिञ्छिकाभ्रमणेषु सपरिवारः परिवृढं ३१
भ्रामयन्मुकुलितनयनः क्षणमतिष्ठत् ॰ तदनु विषमविषमुल्बणं वमंतः फणालेकरशार

© Dharmartha Trust J&K. Digitized by eGangotri

त्तरञ्जिनीराजितराजमंदिराभोगाभोगिनोभयंजनयंतोनिश्चेरुः॥४७॥ अथश्चबहवस्कंडेरहिपतीनारा
यदिविसमाचरन्· ततोग्रजन्मानरसिंहस्यहिरण्यकशिपोर्देत्येश्वरस्यविदारणमभिनीयमाह
दाश्चर्यान्वितंराजानमभाषत· राजन्नवसानसमयेभवताशुभसूचकंदृष्टमुचितं· ततःकल्याण
परंपरावाप्तयेभवदात्मजाकारायास्तरुण्यानिखिललक्षणोपेतस्यराजनंदनस्यविवाहःकार्यइ
ति· तदवलोकनकुतूहलेनमहीपालेनानुज्ञातःससंकल्पितार्थसिद्धिसंभावनसंफुल्लवदनःस
कलमोहजनकमंजनंलोचनयोर्निक्षिप्यपरितोव्यलोकयत· सर्वेभूतदेंद्रिकंजालमेवकर्मेतिसा
भूतंपश्यत्सुरागपल्लवितहृदयेनराजवाहनेनपूर्वसंकेतसमागतामनेकभूषणभूषितांगीमवंति
सुंदरींवैवाहिकमंत्रतंत्रनैपुण्येनाग्निंसाक्षीकृत्यसंयोजयामास· क्रियावसानेसतींद्रजालपुरु
षाःसर्वेगच्छंतुभवंतइतिद्विजन्मनोच्चैरुच्यमानेसर्वेमायामानवायथायथमंतर्भावगताःराजवाह
नोपिपूर्वसंकल्पितेनगूढोपायचातुर्येणेन्द्रजालिकपुरुषवत्कन्यापुरंप्रविवेश· मालवेंद्रोपि

© Dharmartha Trust J&K. Digitized by eGangotri

द॰ कु॰ तदकूतंमन्यमानस्तस्मैवाडवायप्रचुरतरंधनंदत्वाविद्येश्वरस्तमिष्टांसिद्धिंसाधयेतितंविसृज्यस्वयमंत
३२ र्मंदिरंजगाम· ततोवंतिसुंदरीप्रियसहचरीपरिवारावल्लभोपेतासुंदरीमंदिरंययौ· एवंदैवमानु
षबलेनमनोरथसाफल्यमुपेतोराजवाहनःसरसमधुरचेष्टाभिःशनैःशनैर्हरिणलोचनायाल
ज्जामपनयन्सुरतरागमुपनयन्रहोविश्रंभमुपजनयन्संलापेतदनुलापपीयूषलोलुपश्चित्रंचि
त्रंचित्तहारिणींचतुर्दशभुवनवृत्तांतंश्रावयामास॥ ॥इतिश्रीदंडिनःकृतौदशकुमारचरिते
पूर्वपीठिकासमाप्ता॥ ॥संवत १८३६

© Dharmartha Trust J&K. Digitized by eGangotri

६२

© Dharmartha Trust J&K. Digitized by eGangotri